# Dvijaproktam Bilvityadina Shivarchanopadesham

# દ્વિજપ્રોક્તં બિલ્વિત્યાદિના શિવાર્ચનોપદેશમ્

## Document Information

Text title : Dvijaproktam Bilvityadina Shivarchanopadesham

File name : dvijaproktaMbilvityAdinAshivArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 25| 316-328||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# દ્વિજપ્રોક્તં બિલ્વિત્યાદિના શિવાર્ચનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

દ્વિજઃ (ઉવાચ) -

બિલ્વપત્રાન્તરાલૈસ્તુ સઞ્છાદ્ય શિવમસ્તકમ્ ।
શિવલોકમવાપ્નોતિ શિવેન સહ મોદતે ॥ ૩૧૬॥

બિલ્વપત્રૈઃ સમભ્યર્ચ્ય શઙ્કરં યાતિ શઙ્કરમ્ ।
મહદ્ભ્યઃ પાતકેભ્યોઽપિ મુક્તિં યાસ્યત્યસંશયમ્ ॥ ૩૧૭॥

ત્રિદલં ત્રિગુણાકારં ત્રિણેત્રં ચ ત્રિયાયુષમ્ ।
ત્રિજન્મપાપસંહારમેકવિત્વં શિવાર્પિતમ્ ॥ ૩૧૮॥

ત્રિશૂલસન્નિભૈરીશે બિલ્વપત્રૈઃ સમર્ચિતે ।
સદ્ય એવ વિનશ્યન્તિ મહાપાતકકોટયઃ ॥ ૩૧૯॥

બિલ્વપત્રેણ શુષ્કેણાપ્યર્ચિતઃ પાર્વતીપતિઃ ।
દદાતિ પરમામૃદ્ધિં સાયુજ્યં ચ તનુવ્યયે ॥ ૩૨૦॥

બિલ્વપત્રં સ્વતઃ શુદ્ધં શિવપ્રિયકરં શુભમ્ ।
શુભે પર્યુષિતત્ત્વં ચ બિલ્વપત્રેષુ ન ધ્રુવમ્ ॥ ૩૨૧॥

બિલ્વપત્રસ્ય ચૂર્ણૈરપ્યર્ચનીયઃ સદાશિવઃ ।
રત્નવદ્રક્ષણીયાનિ બિલ્વપત્રાણિ સન્તતમ્ ॥ ૩૨૨॥

બિલ્વપત્રાર્ચનેનૈવ તુષ્ટો ભવતિ શઙ્કરઃ ।
મહાદેવસ્ય સામ્બસ્ય બિલ્વપત્રમતિપ્રિયમ્ ॥ ૩૨૩॥

યથા પ્રિયા હૈમવતી બિલ્વપત્રં તથા પ્રિયમ્ ।
અખણ્ડૈર્નૂતનૈઃ શુદ્ધૈર્બિલ્વપત્રૈઃ પ્રયત્નતઃ ॥ ૩૨૪॥

યઃ પૂજયતિ ગૌરીશં સ ગૌરીશં પ્રયાસ્યતિ ।
કરવીરસ્ય પુષ્પેણ રક્તેન ધવલેન વા ॥ ૩૨૫॥

યઃ પૂજયતિ ગૌરીશં સ પાપેભ્યો વિમુચ્યતે ।
યત્પુણ્યં લભતે મર્ત્યો શિવે રત્નસમર્ચનાત્ ॥ ૩૨૬॥

તત્પુણ્યં લભતે મર્ત્યઃ કરવીરસ્ય પૂજયા ।
સુવર્ણકમલાનાં ચ પૂજયા ગિરિજાપતિઃ ॥ ૩૨૭॥

હૃષ્ટો દદાતિ સાયુજ્યમર્ચકાય ન સંશયઃ ॥ ૩૨૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે દ્વિજપ્રોક્તં બિલ્વિત્યાદિના શિવાર્ચનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૫। ૩૧૬-૩૨૮॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 25 . 316-328..

Proofread by Ruma Dewan

*Dvijaproktam Bilvityadina Shivarchanopadesham*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*